This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M160 विषय वैदिक

नाव. हिरण्यकेशीय पशुबंध प्रयोग Mss

लेखक/लिपीकार श. अ. जोशी.

पृष्ठ 64 काळ शके 1874 पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M160

ॐ

॥ अथ हिरण्यकेशी पशुबंध प्रयोग प्रारंभः ॥

–राः अः जोशी–

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ श्रीगणेशायनमः ॥ ॐ हिरण्यकेशी सूत्रानुसारि निरूढ पशुबंध प्रयोगः ॥ यजमानः ॥

आचम्य तीर्थेन प्रविश्यापरेण गार्हपत्यं दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्यासह
प्राणानायम्य श्रीपरमेश्वरप्रीत्यर्थं ऐंद्राग्नेन निरूढपशुबंधेन यक्ष्ये ॥ गणेशं संपूज्य
तत ऋत्विग्वरणं ॥ अस्मिन्नैंद्राग्न निरूढ पशुबंध कर्मण्यध्वर्युत्वा मह्ं वृणे ॥
इत्यध्वर्युं वृणुयात् ॥ एवं ब्रह्माणं होतारमाग्नीध्रं प्रतिप्रस्थातारं मैत्रावरुणंच वृणुयात् ॥
ततस्तान् गंधवस्त्रालंकारादिभिः पूजयेत् ॥ अध्वर्युः ॥ तूष्णीमसिदमादाय तूष्णीं
गार्हपत्ये निष्टप्य तूष्णीमिष्टि॰यतिरिक्त पूर्णाहुति होमकर्मांत पर्याप्तान्दर्भांछित्वा
बध्वाप उप स्पृशति तत आहवनीयादि क्रमेणाग्नीन्परिस्तीर्य ब्रह्म यजमानयोः
सदने कृत्वा ब्रह्मयजमानावुपवेश्य पत्नींचोत्तरेण गार्हपत्यं दर्भांस्संस्तीर्य तेषु
पात्राणि प्रयुनक्ति ॥ स्फ्यं शम्यामग्निं परशुं स्रुवं जुहू मग्निहोत्र हवणी माज्य ॥ १॥

स्थालीं प्रथमप्रयोगे चतुः पंचाशत्समिधः समिद्द्वयं उपवेशं संमार्ग दर्भान वज्वल
न दर्भांश्चासादयेत् ॥ ॰ग्रहपक्षे उदुंबरशाखाञ्चासादयेत् ॥ तूष्णीं प्रोक्षणीः संस्कृत्यो
त्तानानि पात्राणि प्रोक्ष्य स्रुवं जुहूंच संमृज्य संमार्गानग्नावाधाय पवित्रांतर्हिता
माज्यस्थाल्या माज्यं निरूप्येत्यादि पवित्रे प्रोक्ष्याग्नावाधायेत्यंतं कृत्वा ॥ आहव
नीयं परिस्तीर्य तूष्णीं स्मार्तावृता परिषिच्य सकृद्गृहीत्वैकां समिधमाधाया
ग्रेणाहवनीयं परीत्य दक्षिणतस्तिष्ठन् ॥ सूर्यंते चक्षुः ॥ वातं प्राणः ॥ द्यां पृष्ठं ॥ अं
तरिक्षमात्मा ॥ अंगैर्यज्ञं ॥ पृथिवीं शरीरैः ॥ वाचस्पतेच्छिद्रया वाचा ॥ अ
च्छिद्रया जुह्वा ॥ दिविदेवावृधं होत्रा मेरयस्वैहो ॥ स्वाहाकारांतं वाक्यशोमन स्वा
सैव पठित्वा जुहोति ॥ वाचस्पतये ब्राह्मण इदं॰ परिस्तरणानि विसृज्योत्तर परि
षेकं कुर्यात् ॥ ततोन्वारंभणीयास्थ्यां दक्षिणारहितां पशु इष्टिं कुर्यात् ॥ तस्याः
प्रयोगः ॥ अंगत्वान्नसंकल्पः ॥ पौर्णमासंतंत्रं ॥ समाग्ने॰ उत्तममध यज्ञाय॰ इमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि॰ पशु
॥२॥
प्रयोगः

मूर्जंये प्रविष्ठां:॰ वहत्वन्वारंभणीये ष्टीयः हवि रिद मेषां मयि ॥ बर्हिराहरणं ॥
बर्हिषाव्रतं ॥ पंचदश समिधेन्यः ॥ प्रकृतिवदिध्माहरणं ॥ वेदं कृत्वा परिस्तृ
णाति नो भावरनी ॥ कर्मणेवां॰ यज्ञस्य॰ सदने ॥ पात्रप्रयोगे ॥ स्फ्यः एका
दश कपालानि ॥ अग्निहोत्रहवणी मित्यादि ॥ अन्वाहार्यस्थाली चतुर्धाकर
ण पात्र ववर्जं ॥ प्रकृतिवत् ॥ भूपते॰ पवित्र करणादि ॥ निर्वापे ॥ देवस्यत्वा
स॰ भ्या मग्ना विष्णुभ्यां जुष्टं निर्वपामि ॥ इदं देवाना मित्यादि ॥ परिदाने ॥
अग्नी विष्णू हव्यं रक्षेथां ॥ सधूका या मित्यादि ॥ प्रोक्षणे ॥ देवस्यत्वा स॰
भ्यां वो जुष्टं प्रोक्ष्याम्यग्ना विष्णुभ्यां ॥ शुंधत्व मित्यादि ॥ उपधाने ॥ अग्नी
षोमीयवदेकादश कपालान्युपदधाति ॥ एक पुरोडाशत्वा न विभागा निर्दशौ
॥ अभिघारणे ॥ प्रियेण नाम्नां प्रि॰ सद आसीदतु ॥ इत्यासादनं ॥ प्रजापति ॥२॥.
रसि॰ अयं यज्ञः॰ विहृत्य चतुर्होतारौ ॥ अयं वेद इत्यादि ॥ अग्नाविष्णुभ्यां

अनुब्रूहि ॥ अग्नाविष्णू यजा ॥ अग्नाविष्णुभ्या मिदं॰ अग्ना विष्णो रहं देव
यज्यया वृत्रहा भूयासं ॥ अविरुज्य प्राशित्रं ॥ न चतुर्धाकरणं ॥ इदं यजमा
नस्य ॥ अग्रेणाहवनीयं वेदेन यजमानभागं परिहरति ॥ न दक्षिणा ॥ हविः
शेषोद्वासनादि ॥ सूक्तवाके ॥ अग्नाविष्णुभ्या मिदं ॥ अग्ना विष्णो रह मुज्जि
ति मनुज्जेषं ॥ चत्वारः पत्नीसंयाजाः ॥ देवानां पत्नीना मग्ने र्गृहपतये
श्च देवानां पत्नी रग्नि र्गृहपति॰ यासं ॥ इति समस्तानुमंत्रण मेव ॥ नपा
र्णः ॥ वेदस्तरणानुमंत्रणे त्वया वेदिमिति मंत्रः संतनोतीत्यंतः ॥ सि
द्धमिष्टिः संतिष्ठते ॥ अपि वेष्टि करणाशक्तौ संस्कृतादाज्या च्चतुर्गृहीतं
गृहीत्वा दर्विहोमधर्मेणाहवनीये जुहोति ॥ अग्नाविष्णू महि धाम प्रियं वां वी
थो घृतस्य गुह्या जुषाणा ॥ दमेदमे सुष्टुती र्वावृधाना प्रति वां जिह्वा घृत मुच्चरण्ये
त्स्वाहा ॥ अग्नाविष्णुभ्या मिदं॰ ॥ इष्यव शेषस्याहुत्यवशिष्टस्य वाज्यशे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिं० पशु षंप्रज्ञातं निदधाति ॥ आहवनीयं परिस्तीर्य परिषिच्य समिध माधायाग्रेणा प्रयोग
॥३॥ हवनीयं परीत्य दक्षिणतस्तिष्ठन् ॥ उरु विष्णो विक्रमस्वो रुक्षया यनः कृधि
॥ घृतं घृतयोने पिब पप्रयज्ञपतिं तिरस्वाहा ॥ स्रुवेण यूपाहुतिं जुहोति ॥ विष्ण
वइदं० ॥ आज्यशेषं स्रुवं पूर्वाहुतदर्भमुष्टिंचादत्ते तक्ष्णे परशुंप्रयच्छति ॥
यत्रयूपंछेत्स्यंतोभवंति तस्मिन्प्रदेशं ब्रह्म यजमानाध्वर्यवस्तक्षाच गच्छंति
॥ अध्वर्युः ॥ व्यवराध्यन्यूप्यान्वृक्षानतिक्रम्य यजुरुर्ध्वऊर्ध्वशकल
ऊर्ध्वशाखस्तं वृश्चेत ॥ पालाशो निरूढ पशुबंधस्य यूपः ॥ उपस्थानमारभ्य चषा
लकरणांतं यूप्य वृक्षस्य दक्षिणतो ब्रह्म यजमानावुपविशतः ॥ अध्वर्युः ॥
अत्यंन्यानगांनान्यानुपागामर्वाक् त्वा परैरविदं परोवैरैस्तं त्वा जुषे वैष्णवं दे
वयज्यायै ॥ यं ओषयते तं यूप वृक्षमुपतिष्ठते ॥ देवस्त्वा सविता मध्वानक्तु ॥
स्रुवेण गुल्फदघ्ने जानुदघ्नेवा पर्यणक्ति ॥ ओषधे त्रायस्वैनं ॥ ऊर्ध्वाग्रामोष ॥३॥.

धिमंतर्दधाति ॥ स्वधिते मैनंं हिंसीः ॥ परशुना प्रहरति ॥ सकृन्मंत्रः ॥
यः अपउपस्पृश्य ॥ प्रथमः शकलः परापतति तमुपयच्छते ॥ दिवमग्रेण माले
खीरंतरिक्षं मध्येन मा हिंसीः पृथिव्या संभव ॥ प्रांचमुदंचं वा प्रहापयति
॥ अवशिष्टं वृक्षस्थाणुमावृश्चनं ॥ तत्परिस्तीर्य तूष्णीं परिषिच्य तदग्रेणग
त्वा दक्षिणतस्तिष्ठन् ॥ वनस्पते शतवल्शो विरोह स्वाहा ॥ स्रुवेणैनतस्मि
न्नाव्रश्चने जुहोति ॥ वनस्पतय इदं० ॥ यूपमंतरा कुर्वन्नेत्य परिस्तरणानि
विसृज्योत्तरपरिषेकं कुर्यात् ॥ सहस्रवल्शा विवयंं रुहेम ॥ आत्मानं प्र
त्यभिमृश्यापउपस्पृश्य ॥ यं त्वायंं स्वधितिस्तेतिजानः प्रणिनाय महते सौ
भगाय ॥ अधस्तादारभ्योर्ध्वं परशुना यूपशाखाच्छिनत्ति ॥ उदकस्पर्शः ॥
एकं ॥ द्वे ॥ त्रीणि ॥ चत्वारि ॥ इत्यरत्निमितेन दंडेन यूपं मिनोति ॥ उपरेण सह
संख्या ॥ अच्छिन्नो रायः सुवीरः ॥ अग्रं परिवासयति ॥ उदकस्पर्शः ॥ तत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ हि॰ पशु॰
॥ ४ ॥

स्ताक्षा यूपं नाति स्थूलं नात्यणुम तंष्ट मुपरं पुरः पुरोणीया ऽस्सं अष्टाश्रिं तक्ष्णोति ॥ प्रयोग ॥
ततस्तस्यैव वृक्षस्याग्रतो दशांगुलं मध्ये संनतं चषालं करोति ॥ यावदिदं प्रथम
मंगुलिकांडं तावदूर्ध्वं चषाला यूपस्यातिरेचयति ॥ ततोऽद्व्यंगुलं त्र्यंगुलं चतुरंगु
लं वा तक्षण जनित शकलानामन्यतस्वरुं करोति ॥ परिकर्मणो यूपऽस्वरुं च
षालं प्रथमपरा पातितऽशकलमधिमंथनार्थं शकलं चादाय शालां गच्छंति ॥ अध्व
र्युः ॥ तूष्णीमस्यिदमादाय तूष्णीं गार्हपत्येनिष्टप्य वेदार्थं दर्भानाहृत्य वेदोसि येनत्व
मिति वेदं करोति ॥ अग्रेणाहवनीयं वक्ष्यमाणप्रकारेण शौल्वेन मानेन वेदिं
संपाद्य वेदाग्र परिवासनं करोति ॥ यजमानः ॥ इदं तस्मै॰ अध्वर्युः ॥ वेदेन वेदि
मित्यादि सर्व दर्भशेषऽहरति इत्यंतं कृत्वा ॥ ऋतमसीति पूर्वपरिग्रहः ॥ प्राचीं वे यऽ
सवित्यादि अभि गार्हपत्य मित्यंतं लुप्यते ॥ असंनता भवति ॥ एतावान् शेषो भवति ॥ ४ ॥
॥ इमां नरा इत्यादि यत्प्रागुत्तरस्मात्परिग्राहात्तत्कृत्वा ॥ पूर्वार्धे वेदेर्यूपावटायाव

काशमवशिष्य मध्यतः संचारार्थमपि स्थलमवशिष्य शम्यया उत्तरवेदिं विमिमीते ॥ उत्तर
वेदिस्थानस्य पुरस्तादुदीचीनकुंबाऽशम्यां निधाय ॥ वित्तायनी मेसि ॥ स्फ्येनो
दीचीं लेखां लिखति ॥ शम्याया अभ्यंतरं परिलेखनऽसर्वत्र ॥ उदकस्पर्शः ॥
सर्वत्र परिलेखने ॥ दक्षिणतः प्राचीनकुंबां निधाय ॥ तिक्तायनी मेसि ॥ दक्षिणतः
प्राचीं ॥ पश्चादुदीचीनकुंबां निधाय ॥ अवतान्मा नाथितं ॥ पश्चादुदीचीम् ॥
आगत्य उत्तर अग्रेणोत्तरं वेदिदेशं पृष्ठ्या सूत्रस्योत्तरं विधा वायव्यां दिशि प्रांमुख उपविष्टः उत्तरतः
प्राचीनकुंबां निधाय ॥ अवतां मा व्यथितं ॥ उत्तरतः प्राचीं ॥ तत उत्तरेणोत्तरं
वेधऽसंप्रक्रमे चात्वालस्तूष्णीं परिलिखति इत्यन्तम् ॥ ततस्फ्यऽशम्यां निधाय ॥
देवस्य त्वा सवितुः प्र॰ ददे ॥ अभ्रिमादाय ॥ विदेरग्निर्नभो नाम ॥ चात्वालं जा
नुदघ्नं त्रिवितस्तं वा खात्वा ॥ संक्रमं त्रः ॥ उदकस्पर्शः ॥ अग्ने अंगिरः ॥ अभ्रिं
प्रहरति ॥ योस्यां पृथिव्यामसि ॥ पाऽसूनआहस्तेन चादत्ते ॥ आयुषा नाम्ने
हि ॥ हरति ॥ यत्तेनाधृष्टं नाम यज्ञियं तेन त्वा दधे ॥ उत्तरवेद्यां निवपति ॥ अग्ने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि॰ पशु

॥५॥

अंगिर इत्याद्येवं द्वितीयं तृतीयंच हरति ॥ यो द्वितीयस्यामिति द्वितीये मंत्रसंनामः
॥ यस्तृतीयस्यां मितितृतीये ॥ तूष्णींचतुर्थं ॥ सिंहीरसिमाहिषीरसि ॥ उत्तर
वेदिंचतुरश्रां करोति ॥ उरु प्रथस्वोरुते यज्ञपतिः प्रथतां ॥ यावत्कृतशम्या
भ्यंतररेखा व्यापिनीं करोति ॥ ध्रुवासि ॥ शम्यायासंहंति ॥ देवेभ्यः कल्प
स्व ॥ यथा विशीर्णा न स्यात्तथा समर्थयति प्रांतलेपेन ॥ देवेभ्यः शुंधस्व ॥
असंस्कृताभिरद्भिः प्रोक्षति ॥ देवेभ्यः शुंभस्व ॥ मृत्पांसुभिरुपरिष्टाद्युक्तां
करोति ॥ यत्तेक्रूरं यदास्थितंतत्त आप्यायतां तत्त एतेन शुंधतां ॥ पुनरेवाद्भि
रवोक्षति ॥ अत्राप्यसंस्कृता एवापः ॥ उत्तरवेदेर्दक्षिणत उत्तरतो वा स्फ्ये
नैकस्फ्यां निःसार्य ॥ आग्नीध्रं निर्वहत ॥ अपांशेषं निनयति ॥ विभ्राड्
बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतं ॥ वातजूतो यो अभिरक्षतु
त्मना प्रजाः पिपर्ति बहुधा विराजति ॥ उत्तरवेद्यां तान्मृज्जलैर्दृढान्क ॥५॥
रोति ॥ चतुःशिखंडे युवतीकनीने घृतप्रतीके भुवनस्य मध्ये ॥ तयोर्देवा अ

धिसंवसंत उत्तमे नाक इह मादयंतां ॥ वेदिमुत्तरवेदिंच संमृशति ॥ सकृ
न्मंत्रः ॥ उत्तरवेद्यां मध्ये गोष्पदमात्रीं अश्वशफमात्रीं प्रादेशमात्रीं वा चतु
रश्रामुत्तरनाभिं करोति ॥ लौकिकाभ्यां पवित्राभ्यां तूष्णीमग्निहोत्रहवण्यां
प्रोक्षणीः संस्कृत्य प्रतिदिशं अनुक्राममुत्तरवेदिं प्रोक्षति ॥ इंद्रघोषस्त्वा
वसुभिः पुरस्तात्पातु ॥ पुरस्तात्प्रोक्षति ॥ मनोजवास्त्वा पितृभिर्दक्षिण
तः पातु ॥ दक्षिणतः ॥ प्रचेतास्त्वा रुद्रैः पश्चात्पातु ॥ पश्चात् ॥ विश्वकर्मा
त्वादित्यैरुत्तरतः पातु ॥ उत्तरतः ॥ त्वष्टा त्वा रूपैरुपरिष्टात्पातु ॥ पश्चा
दारभ्य वेद्या मध्यभागं प्रोक्षति ॥ पूर्ववत्स्फ्येन लेखामालिख्य ॥ आग्नीध्रं
प्रं निर्वहत ॥ पूर्ववत्प्रोक्षणीशेषं निनयति ॥ उदुंबरशाखाभिरुत्तरवेदि
माच्छादयति ॥ यदि॰ ग्रहसाद्यः पशुः ॥ न साद्यस्कालत्व आच्छादनम् ॥

प्रयोग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि० पशु

॥ ६ ॥

द्विदिनेसाद्यत्वेश्चोग्निप्रणयनादि ॥(सद्यस्कालत्वेश्चोग्निप्रणयनादि)॥ स

द्यस्कालत्वे तदानीमेव ॥ उत्तरेण गार्हपत्यं दर्भान्संस्तीर्य तत्रपात्राणिप्र

युनक्ति ॥ स्रुवंजुहूमग्निहोत्रहवणीमाज्यस्थालीमेकविंशति समिधः

संमार्गदर्भानवज्वलनदर्भानुपवेषमग्न्युद्धरणार्थं पात्रंप्रणयनीयामिध्म

मुपयमनीः सिकताः हिरण्यं पौतुद्रवान्परिधीन्शुक्लामूर्णा स्तुकांगुग्गु

लुसुगंधितेजनं उपसमिंधनार्थानियज्ञियवृक्षकाष्ठानिचासादयति॥

प्राकृताहवनीयस्य दक्षिणतोब्रह्म यजमानावुपवेश्य स्वस्थाने पत्नीं

चोपवेश्य पवित्रकरणादि पवित्रे अन्वाधाये त्यंतं कृत्वा ॥ आहव

नीयेग्निप्रणयनान्यादीपयति सिकताश्चोपयमनीरुपकल्पयतउध

च्छतीध्ममुपयच्छत्युपयमनीरुपयतेन्येन धार्यमाणे ॥ आहवनीयं परि

स्तीर्य परिषिच्य सकृद्गृहीत्वा सामिधमाधायाग्रेणाहवनीयं परीत्य दक्षिण

तः स्तिष्ठन् ॥ यत्ते पावक चकृमा कच्चिदागः पूर्वीयत्संन परोभवासि ॥ ॥ ६ ॥

प्रयोगः

घृतेनत्वं तनुवौ वर्धयस्व मामा हिंसी रधिगतं पुरस्तात्स्वाहा ॥ उद्यतहोमं

जुहोति ॥ अपादानाय पावकायेदं० अग्रेणोत्तरं वेदिं स्वस्थानमेत्य परि

स्तरणानि विसृज्य पूर्ववत्परिषिंचति ॥ स्वहस्तेग्निं गृहीत्वा ॥ होतरे ३

हि होतारमामंत्र्य ॥ अग्नये प्रणीयमानायानुब्रु ३ हि ॥ त्रिरनूक्ताया ं

हरत्युत्तरवेदिं प्राप्यान्यहस्तेग्निं दत्वा जुह्वां पंचगृहीत्वा हिरण्यमंत

र्धायाश्रोण्योत्तरवेदिं व्याघारयति विग्राहं ॥ सिंहीरसि सपत्नसाही

स्वाहा ॥ दक्षिणेंसे ॥ सिंहीरसि सुप्रजावनिस्वाहा ॥ उत्तरस्या

ं श्रोण्यां ॥ सिंहीरसि रायस्पोषवनिस्वाहा ॥ दक्षिणस्यां श्रोण्यां

॥ सिंहीरस्यादित्यवनिस्वाहा ॥ उत्तरेंसे ॥ सिंहीरस्यावह

देवान्देवयते यजमानाय स्वाहा ॥ मध्ये ॥ सर्वश्रोत्तरवेद्या इदं नमम॥

भूतेभ्यस्त्वा ॥ आवृत्यास्रुचं हिरण्यंचोद्गृह्य ॥ यजमानः भूतेभ्य इदं०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पौतुद्रवैः परिधिभिः परिदधाति ॥ विश्वायुरसि पृथिवीं दृंह ॥ मध्यमं
परिदधाति ॥ यजमानः अस्मिन्यज्ञ उपभूय इन्नु मे ऽविक्षोभाय परिधीन्दधामि
॥ धर्ता धरुणो धरीयानग्निर्द्वेषोऽसि निरितो नुदाते ॥ ध्रुवोऽसि ध्रु० ॥ अध्वर्युः
ध्रुवं क्षितिरस्यन्तरिक्षं दृंह ॥ दक्षिणा दर्वी ॥ यज० अस्मिन्यज्ञ० उग्रोऽस्युग्रो
॥ अध्वर्युः ॥ अच्युतक्षिदसि दिवं दृंह ॥ उत्तरा दर्वी ॥ यज० अस्मि० अभि
भूर ॥ अध्वर्युः ॥ अग्नेर्भस्मास्यग्नेः पुरीषमसि ॥ गुग्गुलु सुगंधि ते
जन मूर्णास्तुका चैतान्संभारानेकीकृत्यायतने निवपति ॥ ऊर्णावंतं प्र
थमः सीद योनिमिति होत्रोच्यमाने ॥ यज्ञ प्रतितिष्ठ सुमतौ सुशेवा आ
त्वा वसूनि पुरुधा विशंतु ॥ दीर्घमायुर्यजमानाय कृण्वन्नधामृतेन
जरितारमंधि यज्ञः प्रत्यष्ठात् ॥ संभारेष्वग्निं प्रतिष्ठापयति ॥ यजमानः
॥ युनज्मि त्वा ब्रह्मणा दैव्येन हव्यायास्मै वोढवे जातवेदः ॥ इंधानास्त्वा सु

प्रजसः सुवीरा ज्योग्जीवेम बलिहृतो वयं ते ॥ यन्मे अग्ने अस्य यज्ञस्य रि
ष्याद्यद्वा स्कंदादाज्यस्योत विष्णो ॥ अध्वर्युः ॥ अग्नेः कुलायमसि ॥ आय
तन एव दक्षिणत उपयमनीरुपनिवपति ॥ मनुष्वत्त्वा निधीमहि मनुष्वत्
समिधीमहि ॥ अग्ने मनुष्वदंगिरो देवान्देवायते यज ॥ आसादितैः काष्ठै
रुपसंमिधे ॥ तमग्निं परिस्तीर्य परिषिच्य चतुर्गृहीतं गृहीत्वा चतस्रः
समिधोऽभ्याधाय दर्विहोमधर्मेण चतस्रोऽतिमुक्तीर्जुहोति ॥ अग्निर्यज्ञं
नयतु प्रजानन् मैनं यज्ञहनो विदन् ॥ देवेभ्यो यज्ञं प्रब्रूतात्प्रप्र यज्ञप
तिं तिर स्वाहा ॥ अग्नय० ॥ वायुर्यज्ञं नयतु० तिर स्वाहा ॥ वायव इ० ॥
आदित्यो यज्ञं नयतु० तिर स्वाहा ॥ आदित्यायेदं० ॥ यज्ञो यज्ञं नयतु
प्रजानम्० तिर स्वाहा ॥ यज्ञायेदं न मम ॥ जुहूं स्रुवं च संमृज्य चतुर्गृ
हीतेनाष्टगृहीतेन द्वादशगृहीतेन वा स्रुचं पूरयित्वा समिधमाधाय दर्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

होम धर्मेण जुहोति ॥ सप्तते अग्ने समिधः सप्त जिह्वा० रापृणस्वा घृतेन स्वा
हा ॥ सप्तवतेग्नय इदं० ॥ परिस्तरणानि विसृज्य पूर्ववत्परिषिंचाति ॥ एषो
त्राहवनीयो यतः प्रणीयते स गार्हपत्यो नाग्निहोत्रे ॥ तथा च कालेग्निहोत्रं
कर्तव्यं तंत्र मध्येपि ॥ तच्च प्राकृतेष्वेव ॥ पाशुके वितते तंत्रे होमकाल
उपस्थिते ॥ अपरेष्वेव होतव्यं न त्वेबोत्तरवेदिके ॥ कर्मप्रयुक्त प्रायश्चित्त
होमस्त्वौत्तर वेदिक एव ॥ ममाग्ने० अद्य यज्ञाय० इमामूर्जं यथातिथि ॥ पा
शुबंधः हविरिदमेषां मयि ॥ अंतराग्नी इत्यादि ॥ न वेदिकरणं देवस्यत्वे
त्यासिदादानादि ॥ बर्हिराहरणोत्तरं तूष्णीं प्लक्षशाखाहरणं ॥ सप्तदश सा
मिधेन्यः ॥ इध्मसंभरणे ॥ यत्कृष्णो रूपं कृ० तीन् ॥ ततस्त्वां वि ः शतिधा
संभरामि सुसंभृता ॥ तिस्रः समिधौ यज्ञायुरनुसंचरान् ॥ उपवेषं मे
क्षणं धृ० भृतेत्यादि ॥ तूष्णीमुपवेषः ॥ परिस्तृणीत० नो भावग्नी ॥ क ॥८॥
र्मणेवां० यज्ञस्य० उ० त्तरेण गार्हपत्यं दर्भान्स ः स्तीर्य पाशुकानि पा

त्राणि प्रक्षाल्य द्वंद्वंन्यंचि प्रयुनक्ति ॥ स्फ्यमग्निहोत्रहवणीं ॥ स्रुवस्वधिती
द्वे जुहूर्वसा होमहवनीं द्वितीयां ॥ द्वे चोपभृतौ पृषदाज्यधानीं द्वितीयां
ध्रुवां ॥ द्वे आज्यस्थाल्यौ दधिधानीं द्वितीयां वेदं ॥ समवत्तधानीं द्वे रशने
द्विगुणां द्विव्यायामां त्रिगुणां त्रिगुणां त्रिव्यायामां ॥ द्वे कार्ष्मर्यमय्यौ वपा
श्रपण्यौ द्विशूलामेकशूलां च कुंभीं ॥ हृदयशूलं प्लक्षशाखां ॥ स्वरुं मैत्राव
रुणदंडं ॥ यूपं यूपशकलं ॥ अरणी अधिमंथनशकलं ॥ दर्भौ योक्त्रं ॥
निषेचनपात्रे विभक्तं वेदाग्रार्धं ॥ षट् हिरण्यशकलानि यजमानभागपा
त्रं यवान् हिरण्यं च ॥ अत्र ब्रह्मयजमानयोः सदने करोति ॥ ब्रह्मवरणं ॥
पवित्रे स्थो वै० इमौ प्राणापानौ० विष्णोर्मनसा० न प्रणीता प्रणयनं ॥
यजमान वाचं यच्छ ॥ संप्रेष्यति ॥ कस्त्वा युनक्ति स त्वा युनक्तु ॥ उ
भौ यज्ञं युक्तः ॥ अध्वर्युर्वाग्यतः ॥ संविशंतां दैवी र्विशः० यै ॥ पात्राणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संमृशति ॥ दक्षायवान स्फ्त्या० प्रत्युष्ट० देवोव० आच्छिद्रे० वसोः सूर्यस्य०
आपौदे० उत्तानानि पात्राणि कृत्वा ॥ शुंधध्वं दैव्यां नत्रि० प्रोक्षति ॥ वाचं वि
सृजते यजमानो ध्वर्युश्च ॥ तूष्णीं स्फ्य मादाय ॥ ब्रह्मन्नुत्तरं परिग्राहं प
रिग्रहीष्यामि ॥ ब्रह्मा ॥ बृहस्पते० ॥ अध्वर्युः ॥ वसंवस्त्वा परि० रुद्रास्त्वा०
आदित्यास्त्वा० यजमानः ॥ बृहस्पते० धाओसि पुराक्रूरस्येति नस्तः ॥
भूमिर्भूत्वेत्यस्यैव ॥ पश्चार्धे वेदेर्बितृतीय देशे स्फ्यं तिर्यंच स्तब्धा
॥ प्रोक्षणीरासादयेध्माबर्हिरुपसादयस्रुवंच स्वधितिंच स्रुचश्च संमृ
ड्ढि पत्नीं संनह्याज्येन दध्ना-चोदे ३ हि ॥ अग्निहोत्रहवण्यां पवित्रां
तर्हितायामपआनीयेत्यादि ॥ स्रुवं संमृज्य तेनैव मंत्रेण स्वधितिं
संमार्ष्टि ॥ जुहूं संमृज्य ॥ तूष्णीं बसाहोमहवन्यां नीं संमार्ष्टि ॥ उप
भृतं संमृज्यतेनैव मंत्रेण पृषदाज्यधानीं ॥ प्रकृतवत् ध्रुवां ॥ प्रत्युष्टमित्या ॥१॥

दि ॥ नप्राशित्रं ॥ दिवः शिल्पमित्यादि ॥ पत्नीसंहनं शालामुखीय समी
पे ॥ आज्य निर्वापे ॥ पूषाते इति द्विः ॥ आज्यं निषिच्यापरस्मिन्पात्रे द
धि निषिंचति ॥ इदं विष्णुरित्याज्यस्यैव ॥ अदितौस्थो नाच्छिन्नप
वित्रे ॥ आज्य दधि स्थाल्या वादत्ते ॥ महीनां पयोस्यो० आज्यं निरूप्य म
हीनामिति दधिस्थाल्यां गव्यं दधि निर्वपति ॥ इषेत्वा ॥ ऊर्जेत्वा ॥ द्वय
माज्यस्यैव ॥ तेजसी अनुप्रेतं ॥ उभे सहैव हरति ॥ अग्निस्तेतेजो०
नैत् ॥ आज्यस्यैव ॥ अग्नेर्जिह्वे स्थः सुभुवौ देवानां धाम्नेधाम्ने देवेभ्यो
यजुषे यजुषे भवतं ॥ युगपद्धस्तद्वयेनासादयति ॥ आज्यं दधिस्थः सत्ये
स्थः सत्यस्याध्यक्षेस्थो हविषी स्थो वैश्वानरे वैश्वदेवे उत्पूत शुष्मे
सहेसी सत्यौजेसी स्थः सहमाने स्थः सहेथा मरातीः सहैथा मरातीयतः स
हेथां पृतनाः सहेथां पृतन्यतः ॥ सहस्रवीर्ये स्थस्ते मोजिन्वत माज्ये
स्यद् द्यौं आज्यं दधिनौ स्थः सत्यस्ये सत्ये स्थः सत्यायुषी स्थः स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि० पशु त्यशुंभेस्थः सत्येनेवामभिघारयामि तयोर्वो भक्षीय ॥ आज्यदध्नोदु प्रयोग
॥ १० ॥ क्रमसीत्यावर्तते ॥ अद्भिराज्यं दध्नाज्येनदध्नापः सम्यक्पुनी० शाक्कराभ्या
मिमं यज्ञमवतसंविदानाः ॥ अंतर्वेद्यां निगृण्हाति इत्यादि ॥ जुहूपभृतोश्च
तुर्गृहीते गृहीत्वा आज्यस्थालीगतस्याज्यस्य तृतीयांशं दधन्यानीय
॥ ज्योतिरसि विश्वरूपं विश्वेषां देवानां समित् ॥ पृषदाज्यधान्यां पंच
गृहीतं पृषदाज्यं गृण्हाति ॥ यजमानं ब्रम्हणस्त्वेत्यादि ॥ सुवीर्यायेति द्विः
महीनां पयोसि वि० दुग्धं ॥ एतेन वा मंत्रेण पृषदाज्यं गृण्हाति ॥ यजमान
ग्रहणं ॥ प्रकृतिवद्ध्रुवायां ॥ अपो धृत्येत्यादि बर्हिस्तरणांतं प्रकृतिवत् ॥
याजमानमपि प्रकृतिवत् ॥ वेद्यास्तरणानंतरं तूष्णीं प्लक्षा निधानं दक्षिण (शाखा)
स्यां श्रोण्यां ॥ अनूयाजार्थे उल्मुके उदुह्य हवनीयं कल्पयित्वा ॥ प्रत्या
दाय प्रस्तरं ॥ सूर्यस्य त्वा पुरस्तात्पात्वित्यादि ॥ जुह्वा सादनोत्तरं यत्रकुत्र ॥ १० ॥
चित्प्रदेशे वसाहोमहवनीं निधाय ॥ उपभृतमासाद्य ॥ तेनैव मंत्रेण त

थैव पृषदाज्यधानीमासादयति ॥ पृषदाज्यधान्यां याजमानस्यावृत्तिः ॥
प्रकृतिवद्ध्रुवां ॥ ध्रुवभोस्थः शाक्करो वषट्कारस्य वां मात्रायां सादयामि ॥
इति स्रुवस्वाधिती सहैव ॥ स्योनौ मे सीदतं सुषदौ पृषाधिन्यां प्रथयतं प्रजया
पशुभिः सु० दिवि सीदतं पृथिव्यामंतरिक्ष० सपत्नाः ॥ इमौ स्रुवस्वधिती
अभिजिद्गतो होमान्वृतक्षरो छंदसानुष्टुभेन ॥ सर्वा यज्ञस्य समंतां विष्ठाब्बा
र्हस्पत्येन शर्मणा दै०व्येन ॥ यथावकाशमाज्यस्थाल्यौ ॥ इमे स्थाल्यौ घृत
स्य पूर्णे अच्छिन्नपयसौ शतधारावुत्सौ ॥ मारुतेश०व्येन ॥ एता अस० वि
ष्णूनिस्थवै० ॥ यजमानः ॥ अयं यज्ञः ॥ पंचहोता ॥ अध्वर्युः ॥ संनेब्बाज्येषु
यूपसंमानेन प्रतिपद्यते ॥ देवस्यत्वासावि० माददे भ्रिरसि नारिरसि ॥ अभ्रि
मादाय ॥ परिलिखितं रक्षः परिलिखिता अरातय इदमहं रक्षसो ग्रीवा
अपिकृंतामि योस्मान्द्वेष्टि यंच वयं द्विष्म इदमस्य ग्रीवा अपिकृंतामि ॥ त्रिः
प्रदक्षिणं यूपावटं परिलिखति ॥ अर्धमंतर्वेद्यर्धं बहिर्वेदि ॥ अग्नीधूपाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 टंखनोपरसंमितं द्व्यंगुलेन त्र्यंगुलेन चतुरंगुलेन वोपरमति खनतात् ॥ सं

प्रेष्यति ॥ उदकस्पर्शः ॥ आग्नीध्रः ॥ यूपावटं खनति ॥ अध्वर्युः ॥ यत्ते शि

ल्पः परोवधीति हस्तेन वा शयो ॥ आपस्ते तधातिं यो पुनंतु शुचयः शुचे

॥ यूपं प्रक्षालयति ॥ ततः प्रागवटा यूपं प्रागग्र मुदगग्रं वा स्थापयति ॥ यवम

तीः प्रोक्षणीः कृत्वा ॥ पृथिव्यैत्वा ॥ मूलभागं प्रोक्षति ॥ अंतरिक्षायत्वा ॥ म

ध्यभागं ॥ दिवेत्वा ॥ अग्रभागं ॥ शुंधतां लोकः पितृषदनः ॥ यूपावटे पोवन

यति ॥ यवोसि यवयास्मद्द्वेषो यवयारातीः ॥ यवं प्रास्यति ॥ पितृणां सस

दनमसि ॥ प्राचा बर्हिषावस्तृणाति ॥ स्वावेशोस्यग्रेगा नेतृणां वनस्पतिरधि

त्वा स्थास्यति तस्य वित्तात् ॥ प्रथमपरापातितं शकलमधस्तात्त्वक्कमव

टे वदधाति ॥ यूपावटे हिरण्यं निधाय ॥ यूपावटं परिस्तीर्य परिषिच्य ॥ हिरण्य ॥११॥

मभिलक्षीकृत्य स्रुवेण दर्विहोमधर्मेणावटे जुहोति ॥ घृतेन द्यावापृथिवी

आपृणेथां स्वाहा ॥ द्यावापृथिवीभ्यामिदं० ॥ परिस्तरणानि विसृज्योत्तरप

रिषेकं कुर्यात् ॥ होतरेँ३ हि ॥ होतारमामंत्र्य ॥ यूपायाज्यमानायानुब्रू३हि

॥ संप्रेष्यति ॥ अग्रेणाहवनीयं यूपस्य पुरस्तात्प्रत्यङ् तिष्ठन् स्ववर्तिमके

न यूपशकलेन लौकिकेनाज्येन यजमानो यूपमनक्ति ॥ देवस्त्वा सविता

मध्वानक्तु ॥ अग्रं ॥ ऐंद्रमसि ॥ अंतरतो बाह्यतश्चषालमनक्ति ॥ सुपि

प्पला भ्यस्त्वौषधीभ्यः ॥ यूपाग्रे चषालं प्रतिमुंचति ॥ अध्वर्युः ॥ देवस्त्वा

सविता मध्वानक्तु ॥ आंतमग्निष्ठामग्निमनक्ति ॥ रशनादेशे त्रिः प्रदक्षि

णं परिमृशति ॥ मध्ये वा ॥ अनक्तमुपरं ॥ आंजनप्रभृति यजमानो यूपं

नानुसृजत्या परिव्ययणात् ॥ यूपायोच्छ्रीयमाणायानुब्रू३हि ॥ संप्रेष्य

ति ॥ उद्दिवं स्तभानांतरिक्षं पृण पृथिवीमुपरेण दृंह ॥ उच्छ्रयति ॥ तेते

धामान्युश्मसी गमध्ये गावो यत्र भूरिशृंगा अयासः ॥ अत्राहतदुरुगाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्य विष्णोः परमं पद मवभाति भूरेः ॥ अवटे यूपं निदधाति ॥ विष्णोः कर्माणि
पश्यत यतो व्रतानि पस्पशे ॥ इंद्रस्य युज्यः सखा ॥ तद्विष्णोः परमं पदꣳ सदा
पश्यंति सूरयः ॥ दिवीव चक्षुराततं ॥ यूपमृजुं करोति ॥ अग्निनाग्निष्वाꣳ
सदिशं मिनोति ॥ आहवनीयं प्रति नम्र प्रकारो परं सम्यगवस्थापयति ॥
ब्रह्मवनिं त्वा क्षत्रवनिꣳ सुप्रजावनिꣳ रायस्पोषवनिं पर्यूहामि ॥ प्रद
क्षिणं पुरीषेण पर्युहति ॥ ब्रह्म दृꣳह क्षत्रं दृꣳह प्रजां दृꣳह रायस्पोषं दृꣳ
ह ॥ मैत्रावरुण दंडेन परिदृꣳहति ॥ उन्नंभय पृथिवीं भिंधीदं दिव्यं नभः ॥
उद्रो दिव्यस्य नो देहीशानो विसृजा दृतिं ॥ प्रदक्षिणमपोनुपरिषिंचति ॥
देवस्य त्वा स० ददे ॥ त्रिगुणां त्रिव्यायामां दार्भीꣳ रशनामादत्ते ॥ इदं वि
ष्णुर्विचक्रमे० सुरे ॥ सरशनेन दक्षिणेन पाणिना यूपं त्रिरुन्मार्ष्टि ॥ स
कृन्मंत्रेण द्विस्तूष्णीं ॥ तद्विष्णोः परमं० ततं ॥ यूपस्याग्रे प्रेक्षते ॥ यूपाय
परिवीयमाणायानुब्रू ३ हि ॥ संप्रेष्यति ॥ परिवीरसि परि त्वा दैवी ॥१२॥

र्विशो व्ययंतां परीमꣳ रायस्पोषो यजमानं मनुष्याः ॥ गृहीतया रशनया
नाभिदघ्ने त्रिः प्रदक्षिणं परिव्ययति मध्ये वोत्तरमुत्तरं गुणं करोति ॥ स्थ
विमदणीयसि प्रवयति ॥ दिवः सानुरसि ॥ स्वरुशकलमादत्ते ॥ अंतरि
क्षस्य त्वा सानाववगूहामि ॥ उत्तरेणाग्निष्ठं मध्यमे गुणे स्वरुमवगूहति
॥ उत्तममेव ॥ अत्र यजमानो यूपमुत्सृजाति ॥ पशुदोषेवाधूलात् ॥ आहव
नीयं परिषिच्यापूर्वाज्याद्वसा होम हवन्यां पंचगृहीतं गृहीत्वा पंच समिधो
भ्याधाय दर्विहोम धर्मेण जुहोति ॥ प्रकारवो मननावच्यमाना देवद्रीचीं न
यथ देवयंतः ॥ दक्षिणावाड्वाजिनी प्राच्येति हविर्भिरिंत्यग्नये घृताची स्वाहा
॥ अग्नय इदं० अग्नाविष्णू महि धाम प्रियं वां वीथो घृतस्य गुह्या जुषाणा ॥ द
मे दमे सुष्टुती वावृधाना प्रति वां जिह्वा घृतमुच्चरण्येत् स्वाहा ॥ अग्नाविष्णुभ्या
मिदं० ॥ यो राय ईशे शतदाय उक्थ्यो यः पशूनाꣳ रक्षिता विष्ठितानां ॥ प्रजाप
तिः प्रथमजा ऋतस्य सहस्रधामा जुषताꣳ हविर्नः स्वाहा ॥ प्रजापतय इ०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आराच्छत्रुमपबाधस्व दूरमुग्रोयः शंवः पुरुहूत तेन ॥ अस्मे धेहि यवमद्गोम
दिंद्र कृधी धियंजरित्रे वाजेरत्ना ᳲस्वाहा ॥ इंद्रायेदं० ॥ आनो नियुद्भिः शति
नीभिरध्वरᳲसहस्त्रिणीभिरुपयाहि यज्ञं ॥ वायो अस्मिन्हविषि मादयस्व
यूयंपात स्वस्तिभिः सदा न स्वाहा ॥ वायव इदं० ॥ उत्तरपरिषेकं कुर्यात् ॥
शाखांतरात् ॥ पुनः परिषिच्यापूर्वाज्याच्चतुर्गृहीतं गृहीत्वा चतस्रः समि
धोभ्याधाय दर्विहोमधर्मेण जुहोति ॥ त्रिर्देवः पृथिवीमेष एतां विचक्रमे श
तर्चसं महित्वा ॥ प्रविष्णुरस्तु तवसस्तवीयान्त्वेषᳲह्यस्य स्थविरस्य नामस्वा
हा ॥ विष्णव इदं० ॥ अग्नौ ज्ञाते यदाज्ञातं० तथᳲस्वाहा ॥ अग्नय इ० ॥ पुरुषसं
मितो० तयᳲस्वाहा ॥ अग्नय इ० ॥ यत्पाकत्रामनसा० तिस्वाहा ॥ अग्नय० ॥ उ
त्तरपरिषेकं कुर्यात् ॥ पुनः परिषिच्य ॥ सकृद्गृहीत्वा एकाᳲसमिधमाधाय ॥ १३ ॥
दर्विहोमधर्मेण जुहोति ॥ भूर्भुवः सुवस्वाहा ॥ प्रजापतय० ॥ उत्तर परिषे
कं कुर्यात् ॥ उपक्लृप्तः पशुरकूटो कर्णो काणो खंजो खंडो षंढो धृष्टो श्रोणो

सप्तशफपंनदंछागो यमान्यतरो यूथ्यो मातृमान् पितृमान् भ्रातृमान्
साखिमान्तᳲस्नापयित्वा ॥ इषेत्वो ॥ परिभोजनीय मुष्टितो द्वे बर्हिषी
आदत्ते ॥ सकृदेवमंत्रः ॥ उपवीरसि ॥ प्लक्षशाखां ॥ ऐंद्राग्नं पशुमुपाक
रिष्ये इत्यध्वर्युर्यजमानं पृष्ट्वा तेनोपाकुर्वित्युक्त उपाकरणं कर्तव्यं ॥ इंद्रा
ग्निभ्यां त्वा जुष्टमुपाकरोम्युपौ देवान्दैवीर्विशः प्रागुर्वन्हीरुशिजो बृहस्प
ते धारया वसूनि हव्याते स्वदंतां देवत्वष्टर्वसुरण्व रेवतीरमध्वं ॥ प्रजा
पतेर्जायमानाः प्रजा जाताश्च या इमाः ॥ तस्मै प्रतिप्रवेदय चिकित्वाᳲ
अनुमन्यतां ॥ इमं पशुं पशुपते ते अद्य बध्नाम्यग्ने सुकृतस्य मध्ये ॥
अनुमन्यस्व सुयजा यजाम जुष्टं देवानामिदमस्तु हव्यं ॥ एतैर्मंत्रैर्बर्हिः प्ल
क्षशाखयाच पशुᳲस्पृशन् देवतार्थत्वेन संकल्पयति ॥ प्रज्ञाते बर्हिषी
प्लक्षशाखां च निदधाति ॥ आहवनीयं परिषिच्य ॥ वसाहोमहवन्या
ᳲस्थाल्याज्यात्पंच गृहीतं गृहीत्वा पंचसमिधोभ्याधाय दर्विहोमधर्मेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जुहोति ॥ प्रजानंतः प्रतिगृ॰हंति पूर्वे प्राणमंगेभ्यः पर्याचरंतं ॥ सुवर्गंयाहि पथि
भिर्देवयानै रोषधीषु प्रतितिष्ठाशरीरैः स्वाहा ॥ पशवइदं० ॥ येषामीशे पशु
पतिः पशुनां चतुष्पदामुतचद्विपदां ॥ निष्क्रीतोयं यज्ञियं भागमैतु रायस्पोषाय
जमानस्य संतु स्वाहा ॥ पशुपतय इ० ॥ येबध्यमानमनु बध्यमाना अभ्यैक्षं
त मनसाचक्षुषाच्च ॥ अग्निस्ता॰ अग्रे प्रमुमोक्तु देवः प्रजापतिः प्रजया
संविदानः स्वाहा ॥ अग्नये प्रजापतयेचेदं० ॥ य आरण्याः पशवो विश्व
रूपा विरूपाः संतो बहुधैकरूपाः ॥ वायुस्ता॰ अग्रे प्रमुमोक्तु देवः प्रजा
पतिः प्रजयासंविदानः स्वाहा ॥ वायवे प्रजापतयेचेदं० ॥ प्रमुंचमाना
भुवनस्य रेतो गातुं धत्त यजमानाय देवाः उपाकृत॰ शशमानं यद
स्थाज्जीवं देवानामप्येतु पाथः स्वाहा ॥ देवेभ्य इ० ॥ यथेतमेत्योत्तर प ॥ १४॥
रिषेकं कुर्यात् ॥ अग्नेर्जनित्रमसि ॥ अधिमंथनशकलमादायापरे
णाहवनीयं बर्हिषि निदधाति ॥ आदाने मंत्रः ॥ वृषणौ स्थः प्रांचौद

भौ शकलेवदधाति ॥ उर्वश्यसि ॥ अधरारणिमादत्ते ॥ पुरूरवाः ॥ उ
त्तरारणिं ॥ घृतेनाक्ते ॥ आज्यस्थाल्या बिले रणी संहेव यत्रकुत्रचित्प्र
देशयोरनक्ति ॥ आयुरसि ॥ एकत्र योजयति ॥ होतरे ३ हि ॥ होतार
मामंत्र्य ॥ अग्नये मथ्यमानायानुब्रू ३ हि ॥ संप्रेष्यति ॥ होत्राभिरनूक्ता
यां ॥ गायत्रं छंदोनुप्रजायस्व ॥ प्रथमं ॥ त्रैष्टुभं छंदोनुप्रजायस्व ॥ द्विती
यं ॥ जागतं छंदोनुप्रजायस्व ॥ तृतीयं ॥ एतैस्त्रिभिः प्रदक्षिणमावृत्यय यथा
सुखमतऊर्ध्वं मंथति ॥ जातायानुब्रू ३ हि ॥ जातेग्नौ संप्रेष्यति ॥ प्रह्रि
यमाणायानुब्रू ३ हि ॥ प्रह्रियमाणे संप्रेष्यति ॥ भवतन्नः समनसौ समो
कसावरेपसौ ॥ मायज्ञ॰ हिं॰ सिष्टं मा यज्ञपतिं जातवेदसौ शिवौ
भवतमद्यनः ॥ अग्नेर्गोत्तरं परिधिसंधिमनुप्रहरति ॥ अग्नावग्नि
श्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः ॥ स्वाहाकृत्य ब्रह्मणाते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि॰ पशु
॥१५॥

जुहोमिमादेवानां मिथुयाकेर्भागधेयं स्वाहा॥ प्रविश्यायागतयइ॰॥ दे
तमग्निमनुत्उक्षीकृत्य स्रुवेणदर्विहोमधर्मेणाभिजुहोति॥ प्रविश्य॰॥ देव
स्यत्वा॰ददे॥ द्विगुणां द्विव्यायामां दाभीं रशना मादत्ते॥ तस्य रशनां तेन
दक्षिणं बाहुमुन्मार्ष्टि॥ ऋतस्यत्वा देवहविः पाशेनारभे॥ दक्षिणे पूर्वपादे
र्धशिरसि च प्रतिमुंचति॥ धर्षामानुषान्॥ पुरस्तात्प्रत्यंचमुदंचंवा यू
पेनियुनक्ति॥ तूष्णीं प्रोक्षणीः संस्कृत्य॥ अद्भ्यस्त्वौषधीभ्यः॥ प्रोक्ष
मि सपवित्रेण पाणिना पशुमुपरिष्टात् प्रोक्षति॥ अपां पेरुरसि॥ पशु
मुदकं पाययति॥ स्वात्तं चित्सदेवं हव्यमापो देवीस्वदतैनं॥ पशोरध
स्तात् हस्तेनोर्ध्वमुदकं मुंचन्प्रोक्षति॥ (यदि पाय्यमानो न पिबेत्तदानवा ॥१५॥
उवेतन्म्रियसे न रिष्यसि देवां इदेषि पथिभिः सुगेभिः॥ यत्रयंति सुकृतो
नापि दुष्कृतस्तत्रत्वा देवः सविता दधातु॥ इति पशुमाभिमंत्रयते)

अयंवेद इत्यादि॥ इध्माद्रेकास्समिधमादायेत्यादि समानमास्रुच्याघारात्
॥स्रुच्यमाघारमाघार्येत्यादि मत्याक्रमणांतं कृत्वा जुह्वा पशुं समनक्ति॥
संतेप्राणो वायुनागच्छतां॥ दक्षिणेर्धशिरसि॥ संयत्रैरंगानि॥ दक्षिणेंऽस जं
मूले॥ संयज्ञपतिराशिषा॥ गुदप्रदेशे॥ समक्तमग्निनेत्यादि॥ प्रवरं प्रवृत्य
सतृणं स्फ्यं धृत्वैव तिष्ठन् मैत्रावरुणाय दंडं प्रयच्छति॥ यजमानः॥ पृथि
वी होता॥ द्यौ॰ वक्ता॥ अध्वर्युः॥ घृतवतीमध्वर्यो स्रुचमास्येत्युच्यमाने जु
हूपभृतावादायात्याक्रम्याआ॰यमत्याआचिते॥ सामिध्यः प्रे३ष्य॥ प्रथमं
प्रयाजं संप्रेष्यति॥ प्रेष्य प्रेष्येत्युत्तरान्॥ प्रकृतिवत्रीन् हुत्वैकादश प्रया
जार्थं जुह्वामवशेष्य चतुर्थे धौमोपभृतं विछिद्यविछिद्य जुह्वामानीय तेन च
तुर्थपंचमषष्ठसप्तमानेकत्रहुत्वा विछिद्याविछिद्याष्टमे सर्वं समानयते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि० पशु ॥ अष्टमस्य स्थाने नवमादयो होत०या:॥ आधानां चतुर्णामुद्देशत्यागानु प्रयोग
॥७६॥ मंत्रणानि प्रकृतिवत्॥ पंचमादिषु अष्टमांतेषु चतुर्थ वेदे वानुमंत्रणं॥
नवमादीनां त्रयाणामुत्तमव देवानुमंत्रणं॥ पंचमादीनामुद्देशो विशेषः॥
दुर्भ्योग्नय इदं०॥ उषासानक्ताभ्यामग्नय इदं०॥ दै०याभ्यामग्नय इदं०॥ ति
स्रोदेवीभ्योग्नय इदं०॥ त्वष्ट्रे देवायाग्नय इदं०॥ वनस्पतयेग्नय इदं०॥
अध्वर्युः॥ देशे ष्टैकादशायाज्यमवाङ्गिष्य प्रत्याक्रम्य॥ घृतेनाक्तौ॥
जुह्वा स्वरुमनक्ति॥ सकृन्मंत्रेण सकृत्तूष्णीं॥ घृतेनाक्तौ॥ सकृत्स्व
× धारां धितेरन्यतरौमनक्ति॥ घृतेनाक्तौ पशुं त्रायेथां॥ स्रुक् स्वधितीभ्यां स्वरु
पशुं समनक्ति॥ शामितरे जाते त्रिः प्रज्ञातासत्॥ अक्तां धारामादि
शन् शामित्रे स्वधितिं प्रयच्छति॥ स्रुचावासाद्य यथास्थानं स्वरु ॥९६॥
मवगूह्य॥ पर्यग्नये क्रियमाणायानुब्रूऽ३हि॥ संप्रेष्यति॥ आग्नीध्रः॥
आहवनीयादुल्मुकमादाय॥ परि वाजपतिः कविरग्निर्ह०यान्यक्रमीत्॥

दधद्रत्नानि दाशुषे॥ इति पशुं शामित्रदेशं चात्वालं यूपमाहवनीयं च प्रत्येकं
प्रदक्षिणं त्रिः परिद्रवति॥ सकृन्मंत्रेण द्विस्तूष्णीं॥ आज्यानि चेत्येकषां
॥ पर्यग्नौ क्रियमाणे अध्वर्युर्वसाहोमहवन्यां स्थाल्या आज्यात् त्रिर्गृही
त्वा दर्विहोमधर्मेण जुहोति॥ ये बध्यमानमनु बध्यमाना अभ्यैक्षंत म
नसा चक्षुषा च॥ अग्निस्तां अग्रे प्रमुमोक्तु देवः प्रजापतिः प्रजया सं
विदानः स्वाहा॥ अग्नये प्रजापतये चेदं०॥ य आरण्याः पशवो० दान
स्वाहा॥ वायवे प्रजापतये चे०॥ प्रमुंचमाना भुव० थस्वाहा॥ देवेभ्य इदं०
॥ आग्नीध्रः॥ आहवनीय समीप आयतन मध्य एवासंसृष्टं प्रज्ञातमुल्मु
कं निधाय प्रदक्षिणं पर्यग्निकरणक्रमेणैव प्रत्येकं त्रिस्त्रिः प्रतिपर्यैति॥
अध्वर्युः॥ यूपात्सरशनं पशुं प्रमुंच॥ आश्राव्य प्रत्याश्राविते॥ उपप्रेष्य
होतर्ह०या देवेभ्यः॥ संप्रेष्यति॥ रेवतीर्यज्ञपतिं प्रियधा निशात॥ बर्हि-
भ्यां वपाश्रपणीभ्यां प्लक्षशाखया च पशुमन्वारभेते यजमानोध्वर्यु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि॰ पशु ॥१७॥

श्च ॥ अध्वर्युः ॥ नानाप्राणो यजमानस्य पशुना यज्ञो देवेभिः सहदेवयानः॥ प्रयोग.
जीवंदेवानामप्येतुपाथः सत्याः संतु यजमानस्य कामाः ॥ यजमानमभिमंत्र
यते ॥ आग्नीध्रः ॥ प्रास्मा अग्निंभरतेति होत्रोच्यमाने ॥ पर्यग्निकरणोल्मुक
मादाय ॥ पशोः पुरतो गच्छति ॥ उरो अंतरिक्ष सजूर्देवेन वातेनास्य हविष
स्त्मनायज ॥ अंतरेण चात्वालोत्कसेरावुदंचो निष्क्रामंति ॥ पशुना सहा
ऽव्यवायेन ॥ आग्नीध्रोध्वर्युर्यजमानश्च ॥ शमितातं पशुंबध्नाग्नीध्रस्य पश्चा
त्पशुनयन्गच्छति ॥ आग्नीध्रः ॥ उत्तरेण चात्वालꣳ शामित्र देशस्तस्मिन्नुल्मुकं
निधायोपसमाधायोत्तरेण शामित्रमतिक्रामन्ति ॥ अध्वर्युः ॥ उदीचीनाꣳ अ
स्यपदो निधत्तादित्युच्यमाने ॥ समस्यतनुवा भव वर्षीयसे यो वर्षीयसी यज्ञे
यज्ञपतिंधाः पृथिव्याः संपृचः पाहि ॥ उपाकरणयो बर्हिषो रन्यतरत्प्रागग्रमुद ॥१७॥
गग्रंवान्यस्यति ॥ तस्मिन्बर्हिषि पशुं प्रत्याक्शिरसमुदीचीनपादं निघ्नंति ॥ अ
मायुं कृण्वंतꣳ संज्ञपयत्ताच्छक्यं प्रबूतात् ॥ इत्युक्त्वा पराङावर्तते ॥ अमायुं

शमितारः संगृह्य मुखं श्वास निरोधेन निघ्नंति ॥

कृण्वं॰तात् ॥ यजमानोप्यध्वर्युणा सहैवोक्त्वा पराङावर्तते ॥ नानाप्राणो॰ माः
॥ अध्वर्युर्यजमानमनुमंत्रयते ॥ यजमानः ॥ स्वर्विदसि स्वर्वित्त्वा स्वरिहि स्वर्म
होꣳ स्वपशुभ्यः ॥ लोकविदसि लोकं वित्त्वा लोकमिहि लोकं महꣳ लोकं पशुभ्यः
॥ गातुविदसि गातुं वित्त्वा गातुमिहि गातुं महꣳ गातुं पशुभ्यः ॥ नाथविदसि नाथं वि
त्त्वा नाथमिहि नाथं महꣳ नाथं पशुभ्यः ॥ नवाउवेतन्म्रियसे नरिष्यसि देवाꣳ इदे
षि पथिभिः सुगेभिः ॥ यत्रयंति सुकृतो नापि दुष्कृतस्तत्र त्वा देवः सविता दधा
तु ॥ आशानां त्वाशापालेभ्यः ॥ चतुर्भ्यो अमृतेभ्य इदं भूतस्याध्यक्षेभ्यो विधे
म हविषा वयं ॥ विश्वा आशा मधुना सꣳ सृजामि ॥ अनमीवा आप ओषधयो
भवंतु ॥ अयं यजमानो मृधो॰ यस्यैतामगृभीताः पशवः संतु सर्वे ॥ पशौ संज्ञ
प्यमाने स्वस्थान उपविष्टः संजपति ॥ इह पशवो विश्वरूपा रमंतामग्निं गृहपति
मभिसंविदानाः ॥ अस्माꣳ अवंतु पयसा घृतेन ॥ यासामूधश्चतुर्बिलं मधोः पू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

